शास्त्री - I (प्रतिष्ठा) 12-06-2021

## शिशुपालवधम् (साहित्यम्)

श्लोकव्याख्या ।

श्लोकस्य व्याख्यां कुरुत →

"गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः ।
पतत्यधो धाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः ॥"

पद्यमिदं महाकविमाघप्रणीतस्य शिशुपालवधमहाकाव्यस्य प्रथमसर्गात् उद्धृतमस्ति । अत्र कविराकाशादवतरतस्य नारदमुनेः द्वारिकावासिभिः जनैः विस्मयेक्षणप्रवर्तनं वर्णयति ।

सूर्यस्य गतिस्तु तिर्यग् भवति (पूर्वान्तात् पश्चिमान्तमित्यर्थः) अग्नेः च ऊर्ध्वं स्फुरणं प्रसिद्धम् लोके । इदन्तु तेजः सर्वतः प्रसरणशीलं अधः पतति । किमिदम् ? इत्येवं प्रकारेण द्वारिकावासिभिः जनैः व्याकुलचित्तेन दृष्टम् ।

अन्वयः → अनूरुसारथेः गतं तिरश्चीनं, हविर्भुजः ऊर्ध्वज्वलनं प्रसिद्धम् । सर्वतः विसारि धाम अधः पतति । 'एतत् किम्' इति जनैः आकुलम् ईक्षितम् ।

व्याकरणम् → अनूरुसारथेः – अविद्यमानौ ऊरू यस्यासौ अनूरुः, अनूरुः सारथिः यस्य सः (बहुव्रीहिः) ।

हविर्भुजः → हविः भुङ्क्ते इति हविर्भुक्, तस्य ।

विसारि → प्रसरणशीलम्, वि + √सृ + णिनि ।

प्रसिद्धम् → विख्यातम्, विश्रुतम्, प्र + √सिध् + क्त ।

ऊर्ध्वज्वलनम् → ऊर्ध्वञ्च तत् ज्वलनम् च [ऊर्ध्वस्फुरणम्] ।

अलङ्कारः → व्यतिरेकः । "उपमानाद् यदन्यस्य व्यतिरेकः स एव सः ।

छन्दः → वंशस्थवृत्तम् । "जतौ तु वंशस्थमुदीरितं जरौ ।"

(signature) 12-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।
का० सि० द० सं० वि० वि० दरभङ्गा ।

अनिवार्यपत्रम् । शास्त्री II 12-06-2021

व्याकरणछात्रहेतवे । रघुवंशम् । श्लोकव्याख्या ।

" यस्यावरोधस्तनचन्दनानां प्रक्षालनाद्वारिविहारकाले ।
कालिन्दकन्या मथुरां गतापि गङ्गोर्मिसंसक्तजलेव भाति ॥ "

सन्दर्भः → प्रस्तुतोऽयं श्लोकः कविकालिदासविरचितस्य रघुवंश-महाकाव्यस्य षष्ठसर्गात् स्वयंवरवर्णनप्रसङ्गात् अवतरितोऽस्ति ।

प्रसङ्गः → कविरत्र सुषेणस्यान्तःपुरस्त्रीजनविलासजीवनं प्रतिपादयति ।

अन्वयः → यस्य वारिविहारकाले अवरोधस्तनचन्दनानां प्रक्षालनात् मथुरां गतापि कालिन्दकन्या गङ्गोर्मिसंसक्तजला इव भाति ।

शब्दार्थः व्याकरणञ्च → यस्य = सुषेणस्य । वारिविहारकाले → वारिषु विहारस्य कालः, तस्मिन् = जलक्रीडावसरे ।
अवरोधस्तनचन्दनानाम् → अवरोधानां स्तनेषु चन्दनानि, तेषाम् = अन्तःपुराङ्गनाकुचमलयजानाम् । प्रक्षालनात् = क्षालनात् ।
मथुराम् = मथुराराजधानीम् । गतापि = प्राप्तापि । कलिन्दकन्या → कलिन्दस्य कन्या या सा = यमुना । गङ्गोर्मिसंसक्तजला → गङ्गाया ऊर्मिभिः संसक्तं जलं यस्या सा = गङ्गातरङ्ग-सम्मिलितसलिला । इव = यथा । भाति = शोभते, विराजते ।

तात्पर्यः → राज्ञः सुषेणस्य स्त्रीणां स्तनेषु संलग्नचन्दनप्रक्षालनात् गङ्गा-तरङ्गमिलितं यमुनाजलमिव मथुरायां सङ्गमदृश्यः प्रतीयते ।

विशेषः → अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः माधुर्यगुणः, उत्प्रेक्षालङ्कारः, उपजातिवृत्तिश्च ।

12-06-2021

डॉ० निर्मलकुमार झा, (स०प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

संस्कृतसामान्यम् । उपशास्त्री I 12-06-2021

अनिवार्यपत्रम् । हितोपदेशः / श्लोकव्याख्या ।

"षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा, तन्द्रा, भयं, क्रोध, आलस्यं, दीर्घसूत्रता ॥"

श्लोकोऽयं महाकविश्रीनारायणपण्डितरचितस्य हितोपदेशग्रन्थस्य मित्रलाभात् गृहीतोऽस्ति ।

चित्रग्रीवनामकः कपोतराजः स्वपरिवारेण सह जालेन बद्ध्या बभूवुः । धैर्यवान् स कपोतराजः जालाद् बहिः आगन्तु चिन्तयामास - विपदि धैर्यधारणं महात्मनां गुणः भवति, विपत्तिकाले विस्मय एव कापुरुषलक्षणम् । तत्र निद्रादीन् षड्दोषान् परित्यज्य आपदुद्धरणे संलग्नः भवाम्यहम् ।

अन्वयः → भूतिम् इच्छता पुरुषेण इह निद्रा, तन्द्रा, भयं, क्रोधः, आलस्यं, दीर्घसूत्रता षड् दोषाः हातव्या ।

शब्दार्थः - व्याकरणञ्च → भूतिम् = ऐश्वर्यम् । इच्छता = वाञ्छता । पुरुषेण = व्यक्तिविशेषेण । इह = अत्र । निद्रा = शयनम् । तन्द्रा = प्रमीला । भयं = बिभीषा, आशङ्का । क्रोधः = कोपः । आलस्यं = शिथिलता । दीर्घसूत्रता = चिरक्रियता, मन्थरगतिना कार्यसम्पादनं

तन्द्रा - √तन्द्र् + घञ् + टाप् । निद्रा - √निन्द् + रक् + टाप् ।
क्रोधः - √क्रुध् + घञ् । भयम् - √भी + अच् (अपादाने) ।

12-06-2021

डॉ० निर्मल कुमार झा (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

साहित्यम् (प्रतिष्ठा)          शास्त्री-III          12-06-2021

अष्टम पत्रम् ।          मालविकाग्निमित्रम् , श्लोकव्याख्या ।

" अनतिलम्बिदुकूलनिवासिनी बहुभिराभरणैः प्रतिभाति मे ।
उडुगणैरुदयोन्मुखचन्द्रिका हततुहिनैरिव चैत्रविभावरी ॥"

प्रसङ्गादिपूर्ववत् ।

अत्र कविकालिदासः राजामुखेन अग्निमित्रेण माध्यमेन मालविकायाः शोभां वर्णयति ।

अन्वयः → अनतिलम्बिदुकूलनिवासिनी बहुभिः आभरणैः उदयोन्मुख-चन्द्रिका हततुहिनैः उडुगणैः ~~ई~~ चैत्रविभावरी इव मे प्रतिभाति ।

शब्दार्थाः व्याकरणानि च → अनतिलम्बिदुकूलनिवासिनी → अनति-लम्बि दुकूले निवसते इति = लघुक्षौमवस्त्रधारिणी ।
बहुभिः = प्रचुरमात्रैः । आभरणैः = अलङ्कारैः ।
उदयोन्मुखचन्द्रिका → उदयोन्मुखीचन्द्रिका यस्याः सा = उदीयमानज्योत्स्ना । हततुहिनैः = अपगतप्रालेयैः ।
उडुगणैः = नक्षत्रसमूहैः । चैत्रविभावरी = मधुमासनिशा ।
इव = यथा । मे प्रतिभाति = मया ज्ञायते ।

अत्र मालविकायाः उपमा चैत्रमासस्य रात्र्या सह भवन् अस्ति । अस्मिन् श्लोके उपमालङ्कारः ।

तल्लक्षणम् → "सादृश्यमुपमा भेदे ।"

छन्दः → द्रुतविलम्बितम् । "द्रुतविलम्बितमाह नभौ भरौ ।"

(हस्ताक्षर) 12-06-21

डॉ० निर्मल कुमार झा, सं० प्राचार्यः ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।